Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लक्ष्मीहृदयं नारायणहृदयं

खेमराज श्रीकृष्णदास प्रकाशन बम्बई

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ
लक्ष्मीहृदयं नारायणहृदयं च

पूजा-पाठ व ज्योतिष पुस्तकों के लिए
नाथ पुस्तक भंडार दूरभाष 3275344
194, दरीबा कलां, दिल्ली 110006

खेमराज श्रीकृष्णदास प्रकाशन, बम्बई - ४.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संस्करण- सन् १९९७ सम्वत् २०५३

मूल्य ४ रुपये मात्र

सर्वाधिकार-प्रकाशक द्वारा सुरक्षित

Printed by Shri Sanjay Bajaj for M / s Khemraj Shrikrishnadass proprietors Shri Venkateshwar press Mumbai - 400 004. at their Shri Venkateshwar press, 66, Hadapsar Industrial Estate, Pune - 411 013.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीगणेशाय नमः ॥ आचम्य प्राणानायम्य देशकालौ संकीर्त्य श्रीलक्ष्मीनारायणप्रसादसिध्या ममाभीष्टकामना-सिध्यर्थं अद्य प्रभृत्यमुकदिनपर्यंतं संकलीकरणरीत्या-संपुटीकरण रीत्यापुरश्चरणरीत्या-सकृदावर्तनपाठरीत्यावा लक्ष्मीनारायणहृदय जपाख्यं कर्म करिष्य इति संकल्प्य न्यासादि कुर्यात् ॥ अस्य श्रीमहालक्ष्मीहृदयमालामंत्रस्य ॥ भार्गव ऋषिः ॥ आद्यादि श्रीमहालक्ष्मीर्देवता ॥ अनुष्टुपा-दिनानाछंदांसि ॥ श्रीर्बीजम् ॥ ह्रीं शक्तिः ॥ ऐं कीलकम् ॥ श्रीमहालक्ष्मीप्रसादसिध्यर्थं जपे विनीयोगः ॥ ॥अथन्यासः॥ ॐ भार्गवऋषये नमः शिरसि ॥ अनुष्टुपादिनानाछंदोभ्यो नमो मुखे ॥ आद्यादिश्रीमहालक्ष्म्यै देवतायै नमो हृदये

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ श्रीं बीजाय नमो गुह्ये ॥ ह्रीं शक्तये नमः पादयोः ॥ ऐं कीलकाय नमः सर्वांगे ॥ ॥ अथ करन्यासः ॥ ॐ श्रीं अंगुष्ठाभ्यां नमः॥ ॐ ह्रीं तर्जनीभ्यां नमः ॥ ॐ ऐं मध्यमाभ्यां नमः ॥ ॐ श्रीं अनामिकाभ्यां नमः ॥ ॐ ह्रीं कनिष्ठिकाभ्यां नमः ॥ ॐ ऐं करतलकरपृष्ठाभ्यां नमः ॥ ॐ श्रीं हृदयाय नमः॥ ॐ ह्रीं शिरसे स्वाहा ॥ ॐ ऐं शिखायै वषट् ॥ ॐ श्रीं कवचाय हुम् ॥ ॐ ह्रीं नेत्रत्रयाय वौषट् ॥ ॐ ऐं अस्त्राय फट् ॥ ॐ श्रीं ह्रीं ऐं इति दिग्बन्धः ॥ अथ ध्यानम् ॥ हस्तद्वयेन कमलेधारयंतीं स्वलीलया ॥ हारनूपुरसंयुक्तां लक्ष्मीं देवीं विचिंतये ॥ इति ध्यात्वा मानसोपचारैः संपूज्य ॥ शंखचक्रगदाहस्ते शुभ्रवर्णे सुवासिनी ॥ मम देहि वरं लक्ष्मीः सर्वसिध्दिप्रदायिनी ॥ इति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संप्रार्थ्य ॐ श्रीं ह्रीं ऐं महालक्ष्म्यै कमलधारिण्यै सिंहवाहिन्यै स्वाहा ॥ इति मंत्रं जप्त्वा पुनः पूर्ववध्दृदयादिषडंगन्यासं कृत्वा स्तोत्रं पठेत् ॥ ॥ वंदे लक्ष्मीं परशिवमयीं शुद्धजांबूनदाभां, तेजोरूपां कनकवसनां सर्वभूषोज्ज्वलांगीम् ॥ बीजापूरं कनककलशं हेमपद्मं दधानामाद्यां शक्तिं सकलजननीं विष्णु-वामांकसंस्थाम् ॥ १ ॥ श्रीमत्सौभाग्यजननीं स्तौमि लक्ष्मीं सनातनीम् ॥ सर्वकामफलावाप्तिसाधनैकसुखावहाम् ॥ २॥ स्मरामि नित्यं देवेशि त्वया प्रेरितमानसः ॥ त्वदाज्ञां शिरसा धृत्वा भजामि परमेश्वरीम् ॥ ३ ॥ समस्तसंपत्सुखदां महाश्रियं समस्तसौभाग्यकरीं महाश्रियम् ॥ समस्त कल्याणकरीं महाश्रियं भजाम्यहं ज्ञानकरीं महाश्रियम् ॥४ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विज्ञानसंपत्सुखदां सनातनीं विचित्र वाग्भूतिकरीं मनोहराम् ॥
अनंतसंमोदसुखप्रदायिनीं नमाम्यहं भूतिकरीं हरिप्रियाम् ॥ ५ ॥
समस्तभूतांतरसंस्थिता त्वं समस्तभोक्त्रीश्वरि विश्वरूपे ॥
तन्नास्ति यत्वव्यतिरिक्तवस्तु त्वत्पादपद्मं प्रणमाम्यहं श्रीः ॥ ६ ॥
दारिद्र्य दुःखौघतमोपहंत्रि त्वत्पादपद्मं मयिसंनिधत्स्व ॥
दीनार्तिविच्छेदनहेतुभूतैः कृपाकटाक्षैरभिषिंच मां श्रीः ॥ ७ ॥
अम्ब प्रसीद करुणासुधयार्द्रदृष्ट्या मांत्वत्कृपाद्रविणगेहमिमं
कुरुष्व ॥ आलोकय प्रणतहृद्गतशोकहंत्रिं त्वत्पादपद्मयुगुलं
प्रणमाम्यहं श्रीः ॥ ८ ॥ शान्त्यै नमोऽस्तु शरणागतरक्षणायै
कान्त्यै नमोऽस्तु कमनीयगुणाश्रयायै ॥ क्षान्त्यै नमोऽस्तु
दुरितक्षयकारणायै धात्र्यै नमोऽस्तु धनधान्यसमृद्धिदायै ॥ ९ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शक्त्यै नमोऽस्तु शशिशेखरसंस्तुतायै रत्यै नमोऽस्तु रजनी-
करसोदरायै ॥ भक्त्यै नमोऽस्तु भवसागरतारिकायै मत्यै
नमोऽस्तु मधुसूदनवल्लभायै ॥ १० ॥ लक्ष्म्यै नमोऽस्तु शुभ-
लक्षण लक्षितायै सिध्द्यै नमोऽस्तु शिवसिध्दसुपूजितायै ॥ धृत्यै
नमोऽस्त्वमितदुर्गतिभंजनायै गत्यै नमोऽस्तु वरसद्गतिदायकायै
॥ ११ ॥ देव्यै नमोऽस्तु दिवि देवगणार्चितायै भूत्यै नमोऽस्तु
भुवनार्तिविनाशनायै ॥ दात्र्यै नमोऽस्तु धरणीधरवल्लभायै
पुष्ट्यै नमोऽस्तु पुरुषोत्तमवल्लभायै ॥ १२ ॥ सुतीव्रदारिद्र्य
विदुःखहंत्र्यै नमोऽस्तु ते सर्वभयापहंत्र्यै ॥ श्रीविष्णुवक्षः स्थल-
संस्थितायै नमो नमः सर्वविभूतिदायै ॥ १३ ॥ जयतु जयतु
लक्ष्मीर्लक्षणालंकृतांगी जयतु जयतु पद्मा पद्मसद्माभिवंद्या ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जयतु जयतु विद्या विष्णुवामांकसंस्था जयतु जयतु सम्यक्
सर्वसंपत्करी श्रीः ॥ १४ ॥ जयतु जयतु देवी देवसंघाभिपूज्या
जयतु जयतु भद्रा भार्गवी भाग्यरूपा ॥ जयतु जयतु नित्या
निर्मलज्ञानवेद्या जयतु जयतु सत्या सर्वभूतांतरस्था ॥ १५ ॥
जयतु जयतु रम्या रत्नगर्भान्तरस्था जयतु जयतु शुद्धा
शुद्धजांबुनदाभा ॥ जयतु जयतु कांता कांतिमद्भासितांगी जयतु
जयतु शांता शीघ्रमागच्छ सौम्ये ॥ १६ ॥ यस्याः कलाद्याः
कमलोद्भवा द्या रुद्राश्च शक्र प्रमुखाश्च देवाः ॥ जीवन्ति सर्वा
अपि शक्तयस्ताः प्रभुत्वमाप्ताः परमायुषस्ते ॥ १७ ॥ लिलेख
निटिले विधिर्मम लिपिं विसृज्यांतर त्वया विलिखितव्यमेतदिति
तत्फलप्राप्तये ॥ तदंतरफले स्फुटं कमलवासिनी श्रीरिमां समर्पय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

समुद्रिकां सकलभाग्यसंसूचिकाम् ॥ १८ ॥ कलया ते यथा देवि जीवन्ति सचराचराः ॥ तथा संपत्करे लक्ष्मीः सर्वदा संप्रसीद मे ॥ १९ ॥ यथा विष्णुर्ध्रुवे नित्यं स्वकलां संन्यवेशयत् ॥ तथैव स्वकलां लक्ष्मी मयि सम्यक् समर्पय ॥ २० ॥ सर्वसौख्यप्रदे देवि भक्तानामभयप्रदे ॥ अचलां कुरु यत्नेन कलां मयि निवेशिताम् ॥ २१ ॥ मुदास्तां मद्भाले परमपदलक्ष्मीः स्फुटकला, सदा वैकुंठश्रीर्निवसतु कला मे नयनयोः ॥ वसेत्सत्ये लोके मम वचसि लक्ष्मीर्वरकला, श्रियः श्वेतद्वीपे निवसतु कला मेऽस्तु करयोः ॥ २२ ॥ तावन्नित्यं ममांगेषु क्षीराब्धौ श्रीकला वसेत् ॥ सूर्याचन्द्रमसौ यावद्यावल्लक्ष्मी पतिःश्रिया ॥ २३ ॥ सर्वमंगलसंपूर्णा सर्वैश्वर्यसमन्विता ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आद्यादि श्रीर्महालक्ष्मीम्त्वत्कला मयि तिष्ठतु ॥ २४ ॥ अज्ञान-
तिमिरं हंतुं शुध्दज्ञानप्रकाशिका ॥ सर्वैश्वर्यप्रदामेऽस्तु त्वत्कला
मयि संस्थिता ॥ २५ ॥ अलक्ष्मीं हरतु क्षिप्रं तमः सूर्यप्रभा
यथा ॥ वितनोतु मम श्रेयस्त्वत्कला मयि संस्थिता ॥ २६ ॥
ऐश्वर्यमंगलोत्पत्तिः त्वत्कलायां निधीयते ॥ मयितस्मा-
त्कृतार्थोऽस्मि पात्रमस्मि स्थितेस्तव ॥ २७ ॥ भवदावे-
शभाग्यार्हो भाग्यवानस्मि भार्गवि ॥ त्वत्प्रसादात्पवित्रोऽहं
लोकमातर्नमोऽस्तु ते ॥ २८ ॥ पुनासि मा त्वं कलयैव यस्मादतः
समागच्छ ममाग्रतस्त्वम् ॥ परं पदं श्रीर्भव सुप्रसन्ना मय्यच्युतेन
प्रविशादिलक्ष्मीः ॥ २९ ॥ श्रीवैकुंठस्थितेलक्ष्मीः समागच्छ
ममाग्रतः ॥ नारायणेन सह मां कृपादृष्ट्यावलोकय ॥ ३० ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सत्यलोकस्थिते लक्ष्मीस्त्वं ममागच्छसंनिधिम् ॥ वासुदेवेन सहिता प्रसीद वरदा भव ॥ ३१ ॥ श्वेतद्वीपस्थिते लक्ष्मीः शीघ्रमागच्छ सुव्रते ॥ विष्णुना सहिते देवि जगन्मातः प्रसीद मे ॥ ३२ ॥ क्षीरांबुधिस्थिते लक्ष्मीः समागच्छ समाधवे ॥ त्वत्कृपादृष्टिसुधया सततं मां विलोकय ॥ ३३ ॥ रत्नगर्भ-स्थिते लक्ष्मीः परिपूर्णहिरण्मयि ॥ समागच्छ समागच्छ स्थित्वाशु पुरतो मम ॥ ३४ ॥ स्थिरा भव महालक्ष्मीः निश्चला भव निर्मले ॥ प्रसन्ने कमले देवि प्रसन्नहृदया भव ॥ ३५ ॥ श्रीधरे श्रीमहाभूते त्वदंतःस्थं महानिधिम् ॥ शीघ्रमुध्दृत्य पुरतः प्रदर्शय समर्पय ॥ ३६ ॥ वसुंधरे श्री-वसुधे वसुदोग्धि कृपामयि ॥ त्वत्कुक्षिगतसर्वस्वं शीघ्रं मे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संप्रदर्शय ॥३७॥ विष्णुप्रिये रत्नगर्भे समस्तफलदे शिवे ॥ त्वद्गर्भगतहेमादीन् संप्रदर्शय दर्शय ॥ ३८ ॥ रसातलगते लक्ष्मीः शीघ्रमागच्छ मे पुरः ॥ न जाने परमं रूपं मातर्मे संप्रदर्शय ॥ ३९ ॥ आविर्भव मनोवेगाच्छीघ्रमागच्छ मे पुरः ॥ मा वत्स भैरिहेत्युक्त्वा कामं गौरिव रक्ष माम् ॥ ४० ॥ देवि शीघ्रं समागच्छ धरणीगर्भसंस्थिते ॥ मातस्त्वद्भृत्य-भृत्योऽहं मृगये त्वां कुतूहलात् ॥ ४१ ॥ उत्तिष्ठ जागृहि त्वं मे समुतिष्ठ सुजागृहि ॥ अक्षयान्हेमकलशान्सुवर्णेन सुपूरितान् ॥ ४२ ॥ निक्षेपान्मे समाकृष्य समुध्दृत्य ममाग्रतः ॥ समुन्नताननना भूत्वा समाधेहि धरांतरात् ॥ ४३॥ मत्संनिधिं समागच्छ मदाहितकृपारसात् ॥ प्रसीद श्रेयसां

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दोग्धि लक्ष्मीर्मे नयनाग्रतः ॥ ४४ ॥ अत्रोपविश लक्ष्मीस्त्वं स्थिरा भव हिरण्मयि ॥ सुस्थिरा भव संप्रीत्या प्रसीद वरदा भव ॥ ४५ ॥ आनीय त्वं तथा देवि निधिन्मे संप्रदर्शय ॥ अद्य क्षणेन सहसा दत्वा संरक्ष मां सदा ॥ ४६ ॥ मयि तिष्ठ तथा नित्यं यथेन्द्रादिषु तिष्ठसि ॥ अभयं कुरु मे देवि महा-लक्ष्मीर्नमोऽस्तु ते ॥ ४७ ॥ समागच्छ महालक्ष्मीः शुध्द जांबूनदप्रभे ॥ प्रसीद पुरतः स्थित्वा प्रणतं मां विलोकय ॥ ४८ ॥ लक्ष्मीर्भुवं गता भासि यत्र यत्र हिरण्मयी ॥ तत्र तत्र स्थिता त्वं मे तव रूपं प्रदर्शय ॥ ४९ ॥ क्रीडसे बहुधा भूमौ परिपूर्णा हिरण्मयी ॥ मम मूर्धनि ते हस्तमविलंबितमर्पय ॥ ५० ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

फलभ्रदाग्योदये लक्ष्मीः समस्तपुरवासिनी ॥ प्रसीद मे महालक्ष्मीः परिपूर्णमनोरथे ॥ ५१ ॥ अयोध्यादिषु सर्वेषु नगरेषु समास्थिते ॥ वैभवैर्विविधैर्युक्ता समागच्छ बलान्विते ॥ ५२ ॥ समागच्छ समागच्छ ममाग्रे भव सुस्थिरा ॥ करुणारस-निष्यंदनेत्रद्वय विलासिनी ॥ ५३ ॥ संविधत्स्व महालक्ष्मीस्त्वच्छाणिं मम मस्तके ॥ करुणासुधया मां त्वमभिषिंच स्थिरीकुरु ॥ ५४ ॥ सर्वराजगृहे लक्ष्मीः समागच्छ मुदान्विते ॥ स्थित्वाशु पुरतो मेऽद्य प्रसादेनाभयं कुरु ॥ ५५ ॥ सादरं मस्तके हस्तं मम त्वं कृपयार्पय ॥ सर्व राजगृहे लक्ष्मीस्त्वत्कला मयि तिष्ठतु ॥ ५६ ॥ आद्यादि श्रीमहालक्ष्मीर्विष्णुवामांकसंस्थिते ॥ प्रत्यक्षं कुरु मे रूपं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रक्ष मां शरणागतम् ॥ ५७ ॥ प्रसीद मे महालक्ष्मीः सुप्रसीद
महाशिवे ॥ अचला भव संप्रीत्या सुस्थिरा भव मद्गृहे ॥ ५८ ॥
यावत्तिष्ठंति वेदाश्च यावत्त्वन्नाम तिष्ठति ॥ यावद्विष्णुश्च यावत्त्वं
तावत्कुरु कृपां मयि ॥ ५९ ॥ चांद्री कला यथा शुक्ले वर्धते सा
दिने दिने ॥ तथा दया ते मय्येव वर्धतामभिवर्धताम् ॥ ६० ॥
यथा वैकुंठनगरे यथा वै क्षीरसागरे ॥ तथा मद्भवने तिष्ठ
स्थिरं श्रीविष्णुना सह ॥ ६१ ॥ योगिनां हृदये नित्यं यथा
तिष्ठसि विष्णुना ॥ तथा मद्भवने तिष्ठ स्थिरं श्रीविष्णुना
सह ॥ ६२ ॥ नारायणस्य हृदये भवती यथास्ते नारायणोऽपि
तव हृत्कमले यथास्थे ॥ नारायणास्त्वमपि नित्यमुभौ तथैव
तौ तिष्ठतां हृदि ममापि दयावति श्रीः ॥ ६३ ॥ विज्ञानवृध्दिं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हृदये कुरु श्रीः सौभाग्यवृद्धिं कुरु मे गृहे श्रीः ॥ दयासुवृद्धिं कुरुतां मयि श्रीः सुवर्णवृद्धिं कुरु मे गृहे श्रीः ॥ ६४ ॥ न मां त्यजेथाः श्रितकल्पवल्लि सद्भक्तचिंतामणिकामधेनो ॥ विश्वस्य मातर्भव सुप्रसन्ना गृहे कलत्रेषु च पुत्रवर्गे ॥ ६५ ॥ आद्यादिमाये त्वमजांडबीजं त्वमेव साकारनिराकृतिस्त्वम् ॥ त्वया धृताश्चाब्जभवांडसंघाश्चित्रं चरित्रं तव देवि विष्णोः ॥ ६६ ॥ ब्रम्हरुद्रादयो देवा वेदाश्चापि न शक्नुयुः ॥ महिमानं तव स्तोतुं मंदोऽहं शक्नुयां कथम् ॥ ६७ ॥ अंब त्वद्भक्तसवाक्यानि सूक्तासूक्तानि यानि च ॥ तानि स्वीकुरु सर्वज्ञे दयालुत्वेन सादरम् ॥ ६८ ॥ भवतिं शरणं गत्वा कृतार्थाः स्युः पुरातनाः ॥ इति संचिंत्य मनसा त्वामहं शरणं व्रजे ॥ ६९ ॥ अनंता नित्यसु-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

खिनस्त्वद्भक्तास्त्वत्परायणाः ॥ इति वेदप्रमाणाद्धि देवि त्वां शरणं व्रजे ॥ ७० ॥ तव प्रतिज्ञा मद्भक्ता न नश्यंतीत्यपि क्वचित् ॥ इति संचिंत्य संचिंत्य प्राणान्संधारयाम्यहम् ॥ ७१ ॥ त्वदधीनस्त्वहं मातस्त्वत्कृपा मयि विद्यते ॥ यावत्संपूर्ण-कामः स्यां तावद्देहि दयानिधे ॥ ७२ ॥ क्षणमात्रं न शक्नोमि जीवितुं त्वत्कृपां विना ॥ न जीवंतीह जलजा जलं त्यक्त्वा जलग्रहाः ॥ ७३ ॥ यथा हि पुत्रवात्सल्याज्जननी प्रस्नुतस्तनी ॥ वत्सं त्वरितमागत्य संप्रीणयति वत्सला ॥ ७४ ॥ यदि स्यां तव पुत्रोऽहं माता त्वं यदि मामकी ॥ दयापयोधरस्तन्य- सुधाभिरभिषिंच माम् ॥ ७५ ॥ मृग्यो न गुणलेशोपि मयि दोषैकमंदिरे ॥ पांसूनां वृष्टिबिंदूनां

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दोषाणां च न मे मतिः ॥ ७६ ॥ पापिनामहमेवाग्र्यो दयालूनां त्वमग्रणीः ॥ दयनीयो मदन्योस्ति तव कोऽत्र जगत्त्रये ॥ ७७॥ विधिनाहं न सृष्टश्चेन्नस्यात्तव दयालुता॥ आमयो वा न सृष्टश्चेदौषधस्य वृथोदयः ॥ ७८ ॥ कृपा मदग्रजा किं ते अहं किं वा तदग्रजः ॥ विचार्य देहि मे वित्तं तव देवि दयानिधे ॥ ७९ ॥ माता पिता त्वं गुरुः सद्गतिः श्रीस्त्वमेव संजीवनहेतुभूता ॥ अन्यन्न मन्ये जगदेकनाथे त्वमेव सर्वं मम देवि सत्ये ॥ ८० ॥ आद्यादि लक्ष्मीर्भव सुप्रसन्ना विशुद्ध विज्ञानसुखैकदोग्ध्री ॥ अज्ञानहंत्री त्रिगुणातिरिक्ता प्रज्ञाननेत्री भव सुप्रसन्ना ॥ ८१ ॥ अशेषवाग्जाड्यमलापहन्त्री नवं नवं स्पष्टसुवाक्प्रदायिनी ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ममेह जिह्वा ग्रसुरंगनर्तकी भव प्रसन्ना वदने च मे श्रीः ॥ ८२ ॥
समस्तसंपत्सु विराजमाना समस्ततेजश्चयभासमाना ॥
विष्णुप्रिये त्वं भव दीप्यमाना वाग्देवता मे नयने प्रसन्ना ॥ ८३ ॥
सर्वप्रदर्शे सकलार्थदे त्वं प्रभासुलावण्यदयाप्रदोग्ध्री ॥ सुवर्णदे
त्वं सुमुखी भव श्रीर्हिरण्मयी मे नयने प्रसन्ना ॥ ८४ ॥ सर्वार्थदा
सर्वजगत्प्रसूतिः सर्वेश्वरी सर्वभयापहंत्री ॥ गर्वोन्नता वं
सुमुखी भव श्रीर्हिरण्मयी मे नयने प्रसन्ना ॥ ८५ ॥
समस्तविघ्नौघविनाशकारिणी समस्त भक्तोद्धरणे
विचक्षणा ॥ अनन्तसौभाग्यसुखप्रदायिनी हिरण्मयी मे
नयने प्रसन्ना ॥ ८६ ॥ देवि प्रसीद दयनीयतमाय मह्यं
देवाधिनाथभवदेवगणाभिवंद्ये ॥ मातस्तथैव भव

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संनिहिता दृशोर्मे पत्यासमं मम मुखे भव सुप्रसन्ना ॥ ८७ ॥
मा वत्स भैरभयदानकरोऽर्पितस्ते मौलौ ममेति मयि
दीनदयानुकंपे ॥ मातः समर्पय मुदा करुणाकटाक्षं
मांगल्यबीजमिह नः सृज जन्म मातः ॥ ८८ ॥ कटाक्ष इह का
मधुक् तव मनस्तु चिंतामणिः करः सुरतरुः सदा
नवनिधिस्त्वमेवेंदिरे ॥ भवेत्तव दयारसो मम रसायनं
चान्वहं मुखं तव कलानिधिर्विविधवांछितार्थप्रदम् ॥ ८९ ॥
यथा रसस्पर्शनतोऽय सोऽपि सुवर्णता स्यात्कमले तथा ते ॥
कटाक्षसंस्पर्शनतो जनानाममंगलानामपि मंगलत्वम् ॥ ९०
॥ देहीती नास्तीति वचः प्रवेशाद्भीतो रमे त्वां शरणं प्रपद्ये ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अतः सदास्मेन्नभयप्रदा त्वं सहैवपत्या मयि संनिधे हि ॥ ९१ ॥ कल्पद्रुमेण मणिना सहिता सुरम्या श्रीस्ते कला मयि रसेन रसायनेन ॥ आस्तां यतो मम च दृक्शिरपाणिपादस्पृष्टाः सुवर्णवपुषः स्थिरजंगमाः स्युः ॥ ९२ ॥ आद्यादिविष्णोः स्थिरधर्मपत्नी त्वमेव पत्या मयि संनिधेहि ॥ आद्यादि-लक्ष्मी त्वदनुग्रहेण पदेपदे मे निधिदर्शनं स्यात् ॥ ९३ ॥ आद्यादि लक्ष्मीहृदयं पठेद्यः स राज्यलक्ष्मीमचलां तनोति ॥ महादरिद्रोऽपि भवेद्धनाढ्यस्तदन्वये श्रीः स्थिरतां प्रयाति ॥ ९४ ॥ यस्य स्मरणमात्रेण तुष्टा स्याद्विष्णुवल्लभा ॥ तस्याभीष्टं ददत्याशु तं पालयति पुत्रवत ॥ ९५ ॥ इदं रहस्यं हृदयं सर्वकामफलप्रदम् ॥ जपः पंचसहस्रं तु पुरश्च-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रणमुच्यते ॥ ९६ ॥ त्रिकालमेक कालं वा नरो भक्तिसमन्वितः ॥
यः पठेच्छृणुयाद्वापि स याति परमां श्रियम् ॥ ९७ ॥ महालक्ष्मीं
समुद्दिश्य निशि भार्गववासरे ॥ इदं श्रीहृदयं जप्त्वा पञ्चवारं
धनी भवेत् ॥ ९८ ॥ अनेन हृदयेनान्नं गर्भिण्या अभिमंत्रि-
तम् ॥ ददाति तत्कुले पुत्रो जायते श्रीपतिः स्वयम् ॥ ९९ ॥
नरेण वाथवा नार्या लक्ष्मीहृदयमंत्रिते ॥ जले पीते च तद्वंशे
मंदभाग्यो न जायते ॥ १०० ॥ य आश्विने मासि च शुक्लपक्षे
रमोत्सवे संनिहितैक भक्त्या ॥ पठेत्तथैकोत्तरवारवृध्द्या लभेत्स
सौवर्णमयीं सुवृष्टिम् ॥ १०१ ॥ य एकभक्तोऽन्वहमेकवर्षं
विशुद्धधीः सप्ततिवारजापी ॥ स मंदभाग्योऽपि रमाकटाक्षा-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवेत्सहस्राक्षशताधिकश्रीः ॥ १०२ ॥ श्रीशांघ्रिभक्तिं हरिदासदास्यं प्रपन्नमंत्रार्थदृढैकनिष्ठाम् ॥ गुरोः स्मृतिं निर्मलबोधबुद्धिं प्रदेहि मातः परमं पदं श्रीः ॥ १०३ ॥ पृथ्वीपतित्वं पुरुषोत्तमत्वं विभूतिवासं विविधार्थसिद्धिम् ॥ संपूर्णकीर्तिं बहुवर्षभोगं प्रदेहि मे देवि पुनः पुनस्त्वम् ॥ १०४ ॥ वादार्थसिद्धिं बहुलोकवश्यं वयः स्थिरत्वं ललनासु भोगम् ॥ पौत्रादिलब्धिं सकलार्थसिद्धिं प्रदेहि मे भार्गवि जन्म-जन्मनि ॥ १०५ ॥ सुवर्णवृद्धिं कुरु मे गृहे श्रीविभूतिवृद्धिं कुरु मे गृहे श्रीः ॥ १०६ ॥ अथ शिरोबीजम् ॥ ॐ यंहंकंलंपं श्रीं ॥ ध्यायेल्लक्ष्मीं प्रहसितमुखीं कोटिबालार्कभासां विद्युद्वर्णांबरवरधरां भूषणाढ्यां सुशोभाम् ॥ बीजापूरं सरसिजयुगं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बिभ्रतीं स्वर्णपात्रं भर्त्रा युक्तां मुहुरभयदां मह्यमप्यच्युत-
श्रीः ॥ १०७ ॥ गुह्यातिगुह्य गोप्त्री त्वं गृहाणास्मत्कृतं
जपम्॥ सिद्धिर्भवतु मे देवि त्वत्प्रसादान्मयि स्थिता ॥ १०८॥
इति श्रीअथर्वण रहस्ये लक्ष्मीहृदयस्तोत्रं संपूर्णम् ॥



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ श्रीगणेशाय नमः ॥ आचम्य प्राणानायम्य देशकालौ निर्दिश्य ममाभीष्टसिध्यर्थं संकलीकरणरीत्या संपुटीकरणरीत्या वा नारायण हृदयस्य सकृदावर्तनं करिष्ये ॥ अस्य श्रीनारायणहृदयस्तोत्र-मंत्रस्य भार्गवऋषिः अनुष्टुप्छंदः श्रीलक्ष्मीनारायणो देवता॥ ॐ बीजम् ॥ नमः शक्तिः ॥ नारायणायेति कीलकम् ॥ श्री लक्ष्मीनारायण प्रीत्यर्थे जपे विनियोगः ॥ ॐ नारायणः परं ज्योतिरित्यंगुष्ठाभ्यां नमः ॥ ॐ नारायणः परं ब्रह्मेति तर्जनीभ्यां नमः ॥ ॐ नारायणः परो देव इति मध्यमाभ्यां० ॥ ॐ नारायणः परो ध्यातेति अनामिकाभ्यां० ॥ ॐ नारायणः परं धामेति कनिष्ठिकाभ्यां० ॥ ॐ नारायणः परो धर्म इति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

करतलकरपृष्ठाभ्यां० ॥ एवं हृदयादि न्यस्य दिग्बंधः कार्यः ॥ ॐ ऐंद्र्यादिदशदिशं ॐ नमः सुदर्शनाय सहस्राराय हुंफट्बधामि नमः चक्राय स्वाहा ॥ इति प्रतिदिशं योज्यम् ॥ अथ ध्यानम् ॥ उद्यदादित्यसंकाशं पीतवाससमच्युतम् ॥ शंखचक्रगदापाणिं ध्यायेल्लक्ष्मीपतिं हरिम् ॥ ॐ नमो नारायणेति जपः ॥ अथ मूलाष्टकम् ॥ ॐ नारायणः परं ज्योतिरात्मा नारायणः परः ॥ नारायण परं ब्रम्ह नारायण नमोऽस्तु ते ॥ १ ॥ नारायणः परो देवो दाता नारायणः परः ॥ नारायणः परो ध्याता नारायण नमोऽस्तु ते ॥ २ ॥ नारायणः परं धाम ध्यानं नारायणः पर ॥ नारायणः परो धर्मो नारायण नमो० ॥ ३ ॥ नारायण

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

परो वैद्यो विद्या नारायणः परः ॥ विश्वं नारायणः साक्षान्नारायण० ॥ ४ ॥ नारायणाद्विधिर्जातो जातो नारायणाच्छिवः ॥ जातो नारायणादिंद्रो नारायण न० ॥ ५॥ रर्विनारायणं तेजश्चांद्रं नारायणं महः ॥ वह्निर्नारायणः साक्षान्नारायण न० ॥ ६॥ नारायण उपास्यः स्यात् गुरुर्नारायणः परः ॥ नारायणः परो बोधो नारायण न० ॥७॥ नारायणः फलं मुख्यं सिद्धिर्नारायणः सुखम् ॥ सेव्यो नारायणः शुद्धो नारायण नमोस्तु ते ॥ ८ ॥ इति मूलाष्टकम् ॥ अथ प्रार्थनादशकम् ॥ नारायणस्त्वमेवासि दहराख्ये हृदि स्थितः॥ प्रेरकः प्रेर्यमाणानां त्वया प्रेरितमानसः ॥ १ ॥त्वदाज्ञां शिरसा धृत्वा जपामि जनपावनम् ॥ नानोपासनमार्गाणां

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भावहृद्भावबोधकः ॥ २ ॥ भावार्थकृद्भावभूतो भाव सौख्यप्रदो भव ॥ त्वन्मायामोहितं विश्वं त्वयैव परिकल्पितम् ॥ ३ ॥ त्वदधिष्ठानमात्रेण सैव सर्वार्थकारिणी ॥ त्वमेव तां पुरस्कृत्य मम कामान्समर्धय ॥ ४ ॥ न मे त्वदन्यस्त्रातास्ति त्वदन्यन्नहि दैवतम् ॥ त्वदन्यं नहि जानामि पालकं पुण्यरूपकम् ॥ ५ ॥ यावत्सांसारिको भावो मनःस्थो भावनात्मकः ॥ तावत्सिद्धिर्भवेत्साध्या सर्वथा सर्वदा विभो ॥ ६ ॥ पापिनामहमेवाग्र्यो दयालूनां त्वमग्रणीः ॥ दयनीयो मदन्योऽस्ति तव कोऽत्र जगत्त्रये ॥ ७ ॥ त्वयाप्यहं न सृष्टश्चेन्न स्यात्तव दयालुता ॥ आमयो नैव सृष्टश्चेदौषधस्य वृथोदयः ॥ ८ ॥ पाप संघपरिक्रांतः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पापात्मा पापरूपधृक्॥ त्वदन्यः कोऽत्र पापेभ्यस्त्राता मे जगतीतले ॥ ९ ॥ त्वमेव माता च पिता त्वमेव त्वमेव बंधुश्च सखा त्वमेव ॥ त्वमेव विद्या च गुरुस्त्वमेव त्वमेव सर्वं मम देवदेव ॥ १० ॥ प्रार्थनादर्शकं चैव मूलाष्टकमुदाहृतम् ॥ यः पठेच्छृणुयान्नित्यं तस्य लक्ष्मीः स्थिरा भवेत् ॥ ११ ॥ नारायणस्य हृदयं सर्वाभीष्टफलप्रदं॥ लक्ष्मीहृदयकं स्तोत्रं यदि चेत्तद्विनाकृतम्॥ १२ ॥ तत्सर्वं निष्फलं प्रोक्तं लक्ष्मीः क्रुध्यति सर्वदा ॥ एतत्संकलितं स्तोत्रं सर्वकर्मफलप्रदम् ॥ १३ ॥ लक्ष्मीहृदयकं चैव तथा नारायणात्मकम्॥ जपेद्यः संकलीकृत्य सर्वाभीष्टमवाप्नुयात्॥ १४ ॥ नारायणस्य हृदयमादौ जप्त्वा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ततः परम् ॥ लक्ष्मीहृदयकं स्तोत्रं जपेन्नारायणं पुनः ॥ १५ ॥ पुनर्नारायणं जप्त्वा पुनर्लक्ष्मीकृतं जपेत् ॥ पुनर्नारायणं जाप्यं संकलीकरणं भवेत् ॥ १६ ॥ एवं मध्ये द्विवारेण जपेत्संकलितं तु तत ॥ लक्ष्मीहृदयकं स्तोत्रं सर्वकामप्रकाशितम् ॥ १७ ॥ तद्वज्जपादिकं कुर्यादितत्संकलितं शुभम् ॥ सर्वान्कामानवाप्नोति आधिव्याधिभयं हरेत् ॥ १८ ॥ गोप्यमेतत्सदा कुर्यान्न सर्वत्र प्रकाशयेत् ॥ इति गुह्यतमं शास्त्रं प्राप्तं ब्रह्मादिकैः पुरा ॥ १९ ॥ तस्मात्सर्वप्रयत्नेन गोपयेत्साधयेत्सुधीः ॥ यत्रैतत्पुस्तकं तिष्ठे लक्ष्मीनारायणात्मकम् ॥ २० ॥ भूतपैशाचवेताला न स्थिरास्तत्र सर्वदा ॥ लक्ष्मीहृदयकं प्रोक्तं विधिना साधयेत्सु-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धीः ॥ २१ ॥ भृगुवारे च रात्रौ च पूजयेत्पुस्तकद्वयम् ॥ सर्वथा सर्वदा सत्यं गोपयेत्साधयेत्सुधीः ॥ गोपनात्साधनाल्लोके धन्यो भवति तत्त्वतः ॥ २२ ॥ इत्यथर्वणरहस्ये उत्तरभागे नारायणहृदयं संपूर्णम् ॥



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इति
लक्ष्मीहृदयं नारायणहृदयं च

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मुद्रक एवं प्रकाशकः
खेमराज श्रीकृष्णदास,
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
खेमराज श्रीकृष्णदास मार्ग, बम्बई-४०० ००४

KHEMRAJ SHRIKRISHNADASS

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection